M. T. B. COLLEGE, SURAT

Manuscripts Library

No Rel.
Ser. 700

Title: Vivaha Prayoga

700

~~विवाह प्रयोग~~

~~Vivāha~~ Prayogapaddhati	: Title
Nārāyaṇa	: Author
	: Editor
	: Year, Vols.
	: Publisher
ह ५/००	: Remarks

100

॥श्रीविवाहप्रयोगप्रारंभः॥

अथवाग्दानप्रयोगः॥

श्रीगणेशायनमः॥ततःकन्यादाताप्राङ्मुखःकन्या
वामतउपविश्यदेशकालौसंकीर्त्यकरिष्यमाण
कन्याविवाहांगभूतंवाग्दानमहंकरिष्ये॥त
दंगगणपतिपूजनमहंकरिष्ये इतिसंकल्पगं
धादिदक्षिणांतैर्गणपतिंपूजयित्वायथाचा
रंकलशपूजनादिचकृत्वास्वस्थानेकन्यां
पूजयित्वावरमुपवेश्यस्वयंतत्प्राच्यांप्रत्य
ङ्मुखउपविश्यतदंगगंधाक्षतताबूलादि

पूजयेत्॥चैवसचस्त्रालारं॥ततोदाताआचारतोहरि
द्राखंडपंचहृढंपूगीफलानिचगंधाक्षतालंकृ
तानिगृहीत्वाअमुकप्रवरान्वितामुकगोत्रो
त्पन्नायामुकप्रपौत्रायामुकपौत्रायामुकपुत्रा
यामुकनाम्नेवराय।अमुकप्रवरान्वितांअमु
कगोत्रोत्पन्नाममुकप्रपौत्रीममुकपौत्रीम
मुकस्यममपुत्रीममुकनाम्नीमिमांकन्यांज्योति
विदादिष्टमुहूर्तेदास्यइतिवाचा॥संप्रददे

विवा

॥२॥ लिचोक्त्वा॥अव्यंगेपतितेऽक्लीबेदशदोषविवर्जि
ते॥इमांकन्यांप्रदास्यामिदेवाग्निद्विजसंन्निधौ॥
इति॥वरपित्रादिवस्त्रप्रांतेबध्वाक्षतौथंचंदने
नार्चयेदित्याचारप्राप्तं॥ततोहरिद्राखंडपंच
पूगीफलानितथैववरपित्रादिगृहीत्वाअमु
कगोत्रांअमुकवरविषयेभवंतोनिश्चिताभ
वंत्वितिदातृवस्त्रप्रांतेप्रक्षेपादिकंकुर्यात्॥
=नानिपूगीफलानिप्रक्षिप्यप्रतिष्ठामंत्रेणोतद= ॥२॥
=रुरमिसौत्रास्त्रित्यादिनावस्त्रे५

तं

ततोदाता॥वाचादत्तामयाकन्यापुत्रार्थंस्वीकृतात्व
या॥कन्याविलोकनविधौनिश्चितत्वंसुखीभवेति॥
वरपितरंप्रतिपठेत्॥सच॥वाचादत्तात्वयाकन्या
पुत्रार्थंस्वीकृतामया॥वरावलोकनविधौनि
श्चितत्वंसुखीभवेति॥दातारंप्रतिपठेत्॥पुत्रा
दौस्वीकर्त्तरिपुत्रार्थंपित्रर्थमित्यूहः कर्त्त
व्यः॥ततोब्राह्मणाः॥शिवाआपःसंतु॥सौमन
स्यमस्तु॥अक्षतंचारिष्टंचास्तु॥दीर्घायुः श्रे

यः शांतिः पुष्टिस्तुष्टिश्चास्तु॥ एतद्वः सत्यमस्त्वित्यै
क्षेत्रा॥ ॐ समानी व आकूतिः समाना हृदयानि वः॥
समानमस्तु वो मनो यथा वः सुसहासति॥ प्रसु
ग्मंतेति मंत्रौ पठेयुः॥ ॐ प्रसुग्मंता धियसानस्य
सक्षणि वरेभिर्वराँ अभि षु प्रसीदतः॥ अस्माक
मिंद्र उभयं जुजोषति यत्सोम्यस्यांधसो बुबो
धति॥ वीद्रया सिदिव्यानि रोचना वि पार्थिवानि
रजसा पुरुष्टुता॥ येत्वा वहति मुहुर ध्वरां उप

ते सुन्वंतु वग्ननाँ अराधसः॥ तद्दिन्मे छंत्सद्वपुषो
वपुष्टरं पुत्रो यज्जानं पित्रोर धीयति॥ जाया पति
वहति वग्नुना सुमत्पुंस इद्भद्रो वहतुः परिष्कृतः॥
तदित्स धस्थमभि चारु दीधय गावो यच्छास
चहतुं न धेनवः॥ माता यन्मंतुर्यूथस्य पूर्व्याभि
वाणस्य सप्तधातुरिज्जनः॥ प्रवो छ्छाभिरिच्चे
देवयुष्ठमेदको रुद्रभियाति लुवणिः॥ जरा वाय
थमतेषु दावने परिवउमे ध्यः सिंचतामधु॥

श्वाहे:...

॥४॥

३क्षेत्रविद्ध्यक्षेत्रविदं ह्यप्राट्स प्रैति३

॥१॥ निधीयमानमपगूळ्हमप्सु प्रमेदेवानांव्रतपा
उवाच॥ इंद्रो विद्वां अनुहि त्वाचचक्षतेनाहम
ग्ने अनुशिष्ट आगां॥ अक्षेत्रविदानुशिष्टः॥
एतद्वैभद्रमनुशासनस्योत स्रुतिं विंदत्यंज
सीनां॥ अद्येदु प्राणीदममन्निमाहापीवृ
तो अधयन्मातुरूधः॥ एमेनमापजरिमा
ले२ युवानमहेळन्वसुः सुमना बभूव॥ एतानि भ
द्राकलशक्रियाम कुरुश्रवण ददतोमघानि॥

॥४॥

दान इद्वोमघवानः सो अस्त्वयं च सोमो हृदि
यंबिभर्मि॥२॥ ततो दाता पात्रस्थसिततंदुलपुं
जे शचीमावाह्य षोडशोपचारैः संपूजयेत्॥
तां च कन्या एवं प्रार्थयेत्॥ देवेंद्राणि नमस्तु
भ्यं देवेंद्रप्रियभामिनि॥ विवाहं भाग्यमारो
ग्यं पुत्रलाभं च देहि मे॥१॥ इति॥ ततः पुरंध्री
भिः नीराजनादि मांगलिकं कार्यं॥ विप्राश्च
गंधतांबूलादिभिः पूजिता आशीर्मंत्रान्॥

॥५॥ पठेत् ॥ ते च ॥ ॐ हिंकृण्वतीवसुपत्नीवसूनांव
त्समिच्छंतीमनसाभ्यागात् ॥ दुहामश्विभ्यांप
योअघ्न्येयंसावर्द्धतांमहतेसौभगाय ॥ १ ॥
समिद्धस्यश्रयमाणःपुरस्ताद्ब्रह्मवन्वानोअ वे ४
जरंसुवीरं ॥ आरेअस्मदमतिंबाधमानउ
च्छ्रयस्वमहतेसौभगाय ॥ २ ॥ वनस्पतेश
तवल्शोविरोहसहस्रवल्शाविवयंरुहेम ॥
॥५॥

यंत्वावयंस्वधितिस्तेजमानप्रणिनायमहतेसौभ
गाय ॥ ३ ॥ इंदुर्देवानामुपसख्यमायंत्सहस्रधा स्त्र २
रःपवतेमदाय ॥ नृभिस्तवानोअनुधामपूर्वम
गन्निंद्रंमहतेसौभगाय ॥ ४ ॥ अस्यपिबत्क्षुमतःप्र
स्थितस्येंद्रसोमस्यवरमासुतस्य ॥ स्वस्तिदाम
नसामादयस्वार्वाचीनोरेवतेसौभगाय ॥ ५ ॥
घृतादुल्लुप्तंमधुमत्सुवर्णंधनंजयंधरुणंधा
रयिष्णु ॥ रिणक्सपत्नादधरांश्चकृण्वदारो
[illegible]

॥८॥ ह मां महते सौभगाय॥८॥ इति षष्ठी भर्गयपदांताः॥
तदस्तु मित्रावरुणा०॥ गृहावै स्स्स्कं प्रतिष्ठासू
क्तं॥ इत्याद्यश्च॥ ॥इति प्रयोगरत्ने वाग्दान
विधिः॥ ॥विवाहपूर्वदिने कर्त्तव्यः॥ शुभासने
प्राङ्मुखउपविश्य स्वदक्षिणे पत्नीं तद्दक्षिण
तः कन्यां वरं वोपविश्य आचम्य प्राणानायम्य इष्टदे
वतागुर्वादिनमस्कारं कृत्वा देशकालौ संकीर्त्य
अस्यामुकनाम्न्याः पुत्रस्य श्वः करिष्यमाणवि

वाहांगभूतं स्वस्तिवाचनमंकुरार्पणं ग्रहयज्ञं नांदी
श्राद्धं मंडपप्रतिष्ठां कुलदेवतादिस्थापनं च करिष्ये
इति संकल्प्य॥ कन्यापितापि अस्याः मुकनाम्न्याः
कन्यकायाः श्वः इत्यादि विशेषेण संकल्प सर्वं
कुर्यात्॥ ~~[illegible]~~ उपनयने पूर्वदिने देश
कालौ स्मृत्वास्य कुमारस्य द्विजत्वसिध्या वेदा
ध्ययनार्थं अंतरित चौलं उपनीयास्य श्वः क

रिष्यमाणः तदंगस्वस्तिपुण्या० ॥ ॥अथमधुपर्कः॥
तत्रैकन्यादातावरस्यपुरतः सुस्नातामलंकृतामह
तवाससंगंधाद्यनुलिप्तास्रग्विणींभुक्तवतींकन्यां
तथाविधासनेप्रत्यङ्मुखींउपवेश्यतांपुरस्कृत्य
सामात्यः सपत्नीकउपविश्यागतायवरायतच्छा
खोक्तविधिनामधुपर्कंकुर्यात् ॥तत्रायंक्रमः॥पा
द्यार्थमर्घ्यार्थंमंत्रवत्त्रिराचमनीयार्थंशुद्धाष्टम
चमनीयार्थंविजपंळपात्रचतुष्टयंमधुयुक्त

दध्यारब्धंमधुपर्कंकांस्यपात्रंगांपंचविंशतिदर्भै
रवागग्रंवामवर्त्तनिकृतंविष्टरंचसंपाद्यप्राणा
नायम्यदेशकालौस्मृत्वाकन्यार्थिनेगृहमा
गतायास्मैस्नातकायवरायकन्यादानांगभूतं
मधुपर्कंकरिष्यइतिसंकल्प्य ॥कन्यार्थिनामि
त्यादिद्वितीयांतमुक्त्वामधुपर्कंप्रार्हंविष्य
तिवासंकल्प्यप्रागुक्तलक्षणंदर्भमयंकूर्चं

विष्टरो विष्टरो विष्टर इति त्रिर्निवेद्यासनार्थं वरहस्ते
दद्यात् ॥ वरस्तु ॥ अर्हंवर्ष्मेत्यस्य वामदेवो विष्टरोऽनु
ष्टुप् ॥ विष्टरोपवेशने विनियोगः ॥ ॐ अर्हंवर्ष्मसु
जातानां विद्युतामिव सूर्यः ॥ इदं तमधितिष्ठामि यो
माकश्चाभिदासति इत्युदगग्रे विष्टर उपविशेत् ॥
विष्टरमंत्रेण पद्भ्यामाक्रम्यासीत ॥ ततोर्चकेन पा
द्यं पाद्यं पाद्यमिति त्रिर्निवेदितं पाद्यं वरो गृह्णी
यात् ॥ ततोर्चकस्तेनोदकेन वरस्य दक्षिणस

म्याः
व्योपादौ क्रमेण क्षालयेत् ॥ नमोस्त्वनंताय ॥ अस्मि
दे२ न्राष्ट्रे श्रियमौंद्रा याम्यतो देवीः प्रतिपद्ययोपः ॥ दक्षि
म३ णं पादमवनेनिजेस्मिन्राष्ट्र इंद्रियं दधामि ॥ सव्यं पाद
मवनेनिजेस्मिन्राष्ट्र इंद्रियं वर्धयामि ॥ पूर्वमन्य
मपरमन्यं पादाववनेनिजे ॥ देवाराध्यस्यांघ्रयुग्मा
भयस्यावरुध्यै ॥ आपः पादावनेजनीर्द्विषंतं निर्द
हंतु मे ॥ ततो वरो लौकिकजलेनाचम्य ॥ गंधपु[illegible]मा
ल्यफलादिसंयुक्तं पूर्ववत् त्रिर्निवेदितमर्घ्यमंज

॥९॥ लिनाप्रतिगृह्यपूर्ववत्कुशैर्निवेदितमाचमनीयंप्र
तिगृह्येतस्येकदेशंगृहीत्वा अम्रतोपस्तरणमसी
तिपीत्वा लौकिकजलेनाचम्य आनीयमानंमधु
पर्कं मित्रस्यत्वा चक्षुषाप्रतीक्षे इत्यवेक्ष्यम
धुपर्कौ मधुपर्को मधुपर्क इति त्रिर्दत्तानिवेदि
तं मधुपर्कं देवस्यत्वा सवितुः प्रसवे श्विनोर्बाहु
भ्यां प्रतिगृह्यतां प्रतिगृह्णामीति मंत्रेण अंजलिना
प्रतिगृह्य अंजलिस्थमेव मधुवाता इति त्र्चेना
पुष्ठोहस्ताभ्यां

वेक्षयेत् ॥ मधुवाताइत्यृचस्य राहुगणो गोतमो वि
श्वेदेवा गायत्री ॥ मधुपर्कावेक्षणे विनियोगः ॥ ॐ
मधुवाता ऋतायते मधुक्षरंति सिंधवः ॥ माध्वीर्नः
संत्वोषधीः ॥ मधुनक्तमुतोषसो मधुमत्पार्थिवं र
जः ॥ मधुद्यौरस्तु नः पिता ॥ मधुमान्नोवनस्पति
र्मधुमां अस्तु सूर्यः ॥ माध्वीर्गावो भवंतु नः ॥१॥
ततः पात्रं सव्यहस्ते धृत्वांगुष्ठानामिकाभ्यां मधुप
र्कं त्रिः प्रदक्षिणमालोड्यांगुष्ठांलिगतं मधुपर्कं

लेपं॥वसवस्त्वागायत्रेणछंदसाभक्षयंतु इति पूर्वस्यां
दिशि निक्षिपेत्॥ एवंरुद्रास्त्वात्रैष्टुभेन छंदसाभ
क्षयंत्विति दक्षिणतः॥आदित्यास्त्वाजागतेन छं सा ३
दसाभक्षयंत्विति पश्चात्॥विश्वेत्वादेवा अनुष्टुभे
न छंदसाभक्षयंत्वित्युत्तरतः॥क्षिप्त्वा भूतेभ्य
स्त्वेति त्रिरावृत्तेन मंत्रेण मध्यात् किंचित् किंचिद्गृही ण ३
त्वा निरूर्ध्वं क्षिप्त्वा मधुपर्कपात्रं भूमौ निधा
य॥मधुपर्कं कदरां गृहीत्वा विराजोदोहमसी

ति प्रथमं प्राश्य लौकिकोदकेनाचम्य पुनर्गृही
त्वा विराजोदोहमसीयेति द्वितीयं प्राश्य लौकिको
दकेनाचम्य पुनर्गृहीत्वा मयि दोहः पद्यायै विरा
ज इति तृतीयं प्राश्य लौकिकजलेनाचम्य॥मधु
पर्कशेषमुदङ्मुखो ब्राह्मणाय प्रयच्छेल्लोकवेद्दृ
ष्टला द्वाप्सु निक्षिप्य पूर्ववन्निवेदिताचमनीयो
दकशेषं गृहीत्वा अमृतापिधानमसीति मंत्रेण
पीत्वा लौकिकोदकेनाचम्याचमनीयं जलशेषं

सुर्वृष्टहीतासत्यंयज्ञा श्रीमैश्रीः श्रयतां इति प्राश्य
लौकिकोदके नद्विराचमेत् ॥ ततोदाता गौर्गौर्गौ
रितिनिवेदितां गां मातारुद्राणामित्यस्य भार्गवो
जमदग्नि गौस्त्रिष्टुप् ॥ गौरुत्स ऊ नेविनियोगः ॥
ॐ मातरुद्राणां दुहिता वसूनां स्वसादित्यानाम
मृतस्य नाभिः ॥ प्रनुवोचं चिकितुषे जनाय मा
गामनागामदितिं वधिष्ट ॥ इति मंत्रं जपित्वा ॥
ॐ उत्सृजत तेल्फ क्वो विसर्जेत् ॥ ततोदातागंध-

ष्टा २

ततोदातागंधमाल्यवस्त्रयज्ञोपवीताभरणादि
भिर्वरं यथाविभवं पूजयेत् ॥ ततोवरेणसहाग
तांस्तद्बधूनपि पूजयेत् ॥ विष्टरलक्षणं गृह्य
परिशिष्टे ॥ पंचाशल्लाभवेद्भ्रस्तातदर्द्धेन तु विष्ट
रः ॥ ऊर्ध्वकेशो भवेद्ब्रह्मा लंबकेशस्तु विष्टरः ॥
दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टर इतिय
द्वा ॥ पंचविंशतिदर्भाणां वेण्यग्रे ग्रंथिभूषिता ॥
विष्टरे सर्वयज्ञेषु लक्षणं परिकीर्त्तितं ॥ मधुपर्केदध्या
प

लाभे
पयो जलंवाप्रतिनिधिः॥मध्वालाभे घृतं गुडो
वा॥वरस्यास्वयामधुपर्कदानभिन्नैके गृह्यप
रिशिष्टे॥वरस्ययाभवे आरवात आरवार्गे चोदिता॥स्व३
मधुपर्कः प्रदातव्यो ह्यन्येशारवपिदातरि॥ ॥
इतिमधुपर्कः॥अथकन्यास्नातापरिहितारक्त
वस्त्रागृहांतः सूत्रवेष्टितोपलसहित दृषदुप
परिहरिद्रानिर्मितौ गौरीहरौ सौभाग्यादिका
मनयापूजयित्वा॥इंद्राणींचतत्रैवाक्षतपुंज

पूजयित्वाप्रार्थयेत्॥देवेंद्राणीनमस्तुभ्यं देवेंद्रप्रि
यभामिनी॥विवाहंभाग्यमारोग्यं पुत्रलाभं चदे
हिमे॥इतिततोगौरीं सौभाग्यादि प्रार्थयमानं
नत्रैवतिष्ठेत्॥अथकन्यादानार्थंजलशुद्धिः॥
पुरोधावरदक्षिणेउदङ्मुखउपविश्यमध्येप्रा
गग्रान्उदगग्रान्वादर्भान्नास्तीर्यतेषुतैजसंशु
द्धतीर्थादिजलपूर्णकलशं निधायव्रीहियवानो
प्यगंधपुष्पादिक्षिपेत्कन्यादूर्वपिह्लुवैर्मुखम

वर्चस्वी यथा लिंगाभिरभिमंत्रयेत् ॥ अथ
कन्यादानादि ब्राह्मणस्त्वलंकृते वेश्मनि सुमंग
ल गीत तूर्य निर्घोषैः क्रियमाणे पूर्वापर भाग
योर्हस्तांतरालं विहाय प्रत्येकं प्रस्थमितसित
तंदुलैर्द्वौ राशी कृत्वा मध्ये कुंकुमादिकृत स्व
स्तिकांकितमंतःपटं राश्योर्मध्ये उत्तरदशं
धारयेयुः ॥ अथ पूर्वराशौ प्रत्यङ्मुखं वरं प
श्चिमराशौ प्राङ्मुखीं कन्यां तंदुलगुड डु

जीरकयुतांजली उभाववस्थाप्य द्विजाः सत्येनो
त्तभितेति सूक्तं पठेयुः ॥ ॐ सत्येनोत्तभिता भू
मिः सूर्येणोत्तभिता द्यौः ॥ ऋतेनादित्यास्ति
ष्ठंति दिवि सोमो अधिश्रितः ॥ सोमेनादित्या
बलिनः सोमेन पृथिवी मही ॥ अथो नक्षत्राणा
मेषामुपस्थे सोम आहितः ॥ सोमं मन्यते पपि
वान्यत्संपिंषंत्योषधिं ॥ सोमं यं ब्रह्माणो विदु

र्न तस्याश्नाति कश्चन ॥ आच्छद्विधानैर्गुपि
तो बार्हतैः सोमरक्षितः ॥ ग्राव्णामिच्छृण्वं
तिष्ठसि न ते अश्नाति पार्थिवः ॥ यत्वा देव
प्रपिबंति तत आप्यायसे पुनः ॥ वायुः सोम
स्य रक्षिता समानां मास आकृतिः ॥ ५ ॥
रैभ्यासीदनुदेयी नाराशंसी न्योचनी ॥ सू
र्याया भद्रमिद्वासो गाथयैति परिष्कृतं ॥ चि

त्तिरा उपबर्हणं चक्षुरा अभ्यंजनं ॥ द्यौर्भूमिः
कोश आसीद्यदयात्सूर्या पतिं ॥ स्तोमा आसन्प्रति
धयः कुरीरं छंद ओपशः ॥ सूर्याया अश्विना
वराग्निरासीत्पुरोगवः ॥ सोमो वधूयुरभवद
श्विनास्तामुभा वरा ॥ सूर्यां यत्पत्ये शंसंतीं मन
सा सविताददात् ॥ मनो अस्या अन आसीद्द्यौरा
सीदुत च्छदिः ॥ शुक्रावनड्वाहावास्तां यदया

युः

त्सूर्यां गृहं ॥१॥ ऋक्सामाभ्यामभिहितौ
गावौ ते सामनावितः॥ श्रोत्रं ते चक्रे आस्तां
दिवि पंथाश्चराचरः॥ शुची ते चक्रे यात्या
व्यानो अक्ष आहतः॥ आनो मनस्मयं
प्रय॰ सूर्यारोहत्प्रयती पतिं॥ सूर्याया वहतुः प्रागा
त्सविता यमवासृजत्॥ अघासु हन्यन्ते गा
वोर्जुन्योः पर्युह्यते॥ यदश्विना पृच्छमाना

के वयातं त्रिचक्रेण वहतुं सूर्यायाः॥ विश्वे देवा अ
नु तद्वामजानन्पुत्रः पितराववृणीत पूषा॥ यद
यातं शुभस्पती वरेयं सूर्यामुप॥ क्वैकं चक्रं
वामासीत्क्व देष्ट्राय तस्थथुः॥ द्वे ते चक्रे सू
र्ये ब्रह्माण ऋतुथा विदुः॥ अथैकं चक्रं यद्गुहा
तदद्धातय इद्विदुः॥ सूर्यायै देवेभ्यो मित्राय
वरुणाय च॥ ये भूतस्य प्रचेतस इदं तेभ्यो

करंनमः॥ पूर्वापरंचरतोमाययैतौशिशूक्रीडं
तौपरियातोअध्वरं॥ विश्वान्यन्योभुवनाभि
चष्टऋतूंरन्योविदधज्जायतेपुनः॥ नवोनं
नवोभवतिजायमानोह्नांकेतुरुषसामेत्य
ग्रं॥ भागंदेवेभ्योविदधात्यायन्प्रचंद्रमा
स्तिरतेदीर्घमायुः॥ सुकिंशुकंशल्मलिं
विश्वरूपंहिरण्यवर्णंसुवृतंसुचक्रं॥

आरोहसूर्येअमृतस्यलोकंस्योनंपत्येवहतुंकृणु
ष्व॥४॥ उदीर्ष्वातःपतिवतीह्येषाविश्वावसुंनम
सागीर्भिरीळे॥ अन्यामिच्छपितृषदंव्यक्तांस
तेभागोजनुषातस्यविद्धि॥ उदीर्ष्वातोविश्वाव
सोनमसेळामहेत्वा॥ अन्यामिच्छप्रफर्व्यंसं
जायांपत्यासृज॥ अनृक्षराऋजवःसंतुपंथा
येभिःसखायोयंतिनोवरेयं॥ समर्यमासंभ
गोनोनिनीयात्संजास्पत्यंसुयममस्तुदेवाः॥

प्रत्वामुंचामिवरुणस्यपाशा॥ येनत्वाबध्नात्स
विता सुशेवः॥ ऋतस्ययोनौ सुकृतस्य लोके
रिष्टांत्वा सहपत्या दधामि॥ प्रेतोमुंचामि
नामुतः सुबद्धाममुतस्करं॥ यथेयमिंद्र
मीढ्वः सुपुत्रासुभगासति॥७॥ पूषात्वेतो
नयतु हस्तगृह्याश्विनात्वाप्रवहतांरथे
न॥ गृहान्गच्छ गृहपत्नी यथासो वशि
~~नीत्वं विदथमावदासि॥~~ इहप्रियं

नीत्वं विदथमावदासि॥ इहप्रियंप्रजयातेसमृ
ध्यतामस्मिन्गृहे गार्हपत्याय जागृहि॥ एना
पत्यातन्वां १ संसृजस्वाधाजिव्री विदथमाव
दाथः॥ नीललोहितं भवति कृत्यासक्ति
र्व्यज्यते॥ एधंते अस्याज्ञातयः पतिर्बंधेषु
बध्यते॥ परादेहि शामुल्यं ब्रह्मभ्यो विभजा
वसु॥ कृत्यैषा पद्वती भूत्व्या जाया विशते प

तिं॥अश्रीरा तन्नूर्भवति रुशती पापयामुया॥पति
र्यद्वध्वो३ वाससा स्वमंगमभिधित्सते॥ ८ ॥ये व
ध्वश्चंद्रं वहतुं यक्ष्मा यंति जनादनु॥पुनस्ता
न्यज्ञिया देवा नयंतु यत आगताः॥मा विदन्
परिपंथिनो य आसीदंति दंपती॥सुगेभि
र्दुर्गमतीतामप द्रांत्वरातयः॥सुमंगलीरियं
वधूरिमां समेत पश्यत॥सौभाग्यमस्यै

दत्वायाथास्तं विपरेतन॥तृष्टमेतत्कटुकमेतद
पाष्ठवद्विषवन्नैतदत्तवे॥सूर्यां यो ब्रह्मा वि
द्यात्स इद्वाधूयमर्हति॥आशसनं विशसन
मथो अधिविकर्तनं॥सूर्यायाः पश्य रूपा
णि तानि ब्रह्मा तु शुंधति॥ ७ ॥गृभ्णामि
ते सौभगत्वाय हस्तं मया पत्या जरदष्टि
र्यथासः॥भगो अर्यमा सविता पुरंधिर्मह्यं

त्वादुर्गार्हपत्याय देवाः ॥ तां पूषं छिवतमामेर
यस्व यस्यां बीजं मनुष्या२ वपंति ॥ या न ऊरू उ
शती विश्रयाते यस्यामुशंतः प्रहराम शेपं ॥
तुभ्यमग्ने पर्यवहंत्सूर्यां वहतुना सह ॥ पु
नः पतिभ्यो जायां दा अग्ने प्रजया सह ॥ पु
नः पत्नीमग्निरदादायुषा सह वर्चसा ॥
दीर्घायुरस्याः पतिर्जीवातु शरदः शतं ॥

सोमः प्रथमो विविदे गंधर्वो विविद उत्तरः ॥
तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥
॥८॥ सोमो ददद्गंधर्वाय गंधर्वो दददग्ने
दा ४ ये ॥ रयिं च पुत्रांश्चादग्निर्मह्यमथो इमां ॥ इ
हैव स्तं मा वियौष्टं विश्वमायुर्व्यश्नुतं ॥ क्री
डंतौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥
आ नः प्रजां जनयतु प्रजापतिराजरसाय स
मनक्त्वर्यमा ॥ अदुर्मंगलीः पतिलोकमा ॥

विराशन्नो भवद्विपदे शं चतुष्पदे ॥ अघोर
चक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः
सुवर्चाः ॥ वीरसूर्देवकामा स्योना शन्नो० ॥
इमां त्वमिंद्र मीढ्वः सुपुत्रां सुभगां कृणु ॥
दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि ॥
सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव ॥
ननांदरि सम्राज्ञी भव सम्राज्ञी अधिदेवृषु ॥

समंजंतु विश्वेदेवाः समापो हृदयानि नौ ॥ संमा
तरिश्वा संधाता समुदेष्ट्री दधातु नौ ॥ ८ ॥ अवि
धवा भव वर्षाणि शतं सा ग्रंतु सुव्रता ॥ तेजस्वी
च यशस्वी च धर्मपत्नी पतिव्रता ॥ जनयद्बहु
पुत्राणि मा च दुःखं लभेत् क्वचित् ॥ भर्तीते
सोमपा नित्यं भवेद्धर्मपरायणः ॥ अष्टपुत्राभ
वेत्वं च सुभगा च पतिव्रता ॥ भर्तुश्चैव पि

सुभर्त्तुरुभयानंदिनी सदा ॥ इंद्रस्य तु यथें
द्राणी श्रीधरस्य यथा श्रिया ॥ शंकरस्य यथा
गौरी तद्वत्वमपि भर्त्तरि ॥ ध्रुवैधि पोष्या मयि
मह्यं त्वादाद्बृहस्पतिः ॥ मया पत्या प्रजावती
संजीव शरदः शतं ॥१॥ पुरंध्रयो मंगलगी
तं कुर्युः ॥ वधूवरौ च समनसेष्टदेवता ध्यायं
तौ ॥ समाहितौ तिष्ठतां ॥ अथ ज्योतिषकेन

मंगलपाठपूर्वकं सुमुहूर्त्तोस्तु तदेव लग्न
मिति पठेत् ॥ प्रतिष्ठाकाले सद्योंतःपटमुद
गपसार्य कन्यावराभ्यां परस्परास्मिन्नंज
लिस्थतंडुलगुडजीरकावकीरणं परस्परं
निरीक्षणं च कारणीयं ॥ तदा वरः ॥ अभ्रा
तृघ्नीं वरुणापतिघ्नीं बृहस्पते ॥ इंद्रापुत्र
घ्नीं लक्ष्म्यं तामस्यै सवितुः सुवेति जपित्वा ॥
अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सु

मना: सुवर्चा:॥वीरसूर्देवकामास्योनाशन्नो
नवृद्धिपदे शं चतुष्पदे॥ इतिमंत्रेणकन्य
यावेक्षमाणा जपित्वादर्भाग्रेणतस्या:भ्र
वोर्मध्ये ॐ भूर्भुव: स्वरितिव्याहृतिभि:
परिमृज्यदर्भं निरस्याप उपस्पृश्ये त्।
तत: त्रिवारं पंचवारं वापरस्पर शिरसि
ऋक्षौ यादिरवंडांतेव धूपूर्वक मंजलिस्था
वे

पिताक्षतारोपणादिकारणीयमाचारात्॥
ॐ ऋक्चवाइदमग्रे साम चास्तां सैवनाम
ऋगासीदमोनामसाम सवा ऋक्सामो
पावदन्मिथुनंसंभवाव प्रजात्या इतिनेत्यब्र
वीत्साम ज्यायान्वा अतो ममम हिमेतिते
द्वे भूत्वोपावदतां तेन प्रतिचन समवदत
तास्तिस्रोभूत्वोपावदंस्ताः तिसृभि:सम नि०४

भवद्दृ धत्तिस्त्रनिः समभवत्तस्मात्तिस्त्रनिः
स्तु वंतितिस्त्रनिरुद्रायंतितिस्त्रनिर्हिसाम
संमितंतस्मादेकस्यबह्व्यो जायाभवंतिनै
कस्यैबहवः सहपतयो यद्वैतत्साचामश्चस
मभवतांतत्सामाभवत्तत्साम्नः सामत्वंसा
मन्भवतियएवंवेदयोवैभवतियःश्रेष्ठतां
मश्नुतेससामक्षावत्स्यसामन्यइतिहिनिंदं

तितेवैपंचान्यद्भूत्वापंचान्यद्भूत्वाकल्पेतामा
हावश्चहिंकारश्चप्रस्तावश्चप्रथमाचऋ
गुद्गीथश्चमध्यमाचप्रतिहारश्चोत्तमाचनि
धनंचवषट्कारश्चतेयत्पंचान्यद्भूत्वापंचान्य
द्भूत्वाकल्पेतांतस्मादाहुः पांक्तोयज्ञः पांक्ताः
पशवइतियद्वैविराजंदशिनीमभिस
मपद्येतांतस्मादाहुर्विराजियज्ञोदशि

न्यांप्रतिष्ठितइत्यावैतौ स्तोत्रियःप्रजानुरू
पःपत्नीधाय्याःपशवःप्रगाथोगृहाःसूक्तं
सवाअस्मिंश्चलोकेमुष्मिंश्चप्रजयाचप
शुभिश्चगृहेषुवसतियएवंवेद॥१॥स्तो
त्रियंशंसत्यात्मावैस्तोत्रियस्तंमध्यम
यावाचाशंसेदात्मानमेवतत्संस्कुरुते
नुरूपंशंसतिप्रजावाअनुरूपःसउच्चै

स्तरामिवानुरूपःशंस्तव्यःप्रजामेवतच्छ्रेयसीमा
त्मनःकुरुतेधाय्यांशंसतिपत्नीवैधाय्यासा
नीचैस्तरामिवधाय्याशंस्तव्याप्रतिवादिनी
हास्यगृहेषुपत्नीभवतियत्रैवंविद्वांनीचैस्त
रांधाय्यांशंसतिप्रगाथंसैशंतिसःस्वरवत्या
यावाचाशंस्तव्यःपशवोवैस्वरःपशवःप्रगा
थःपशूनामेवरुध्याइंद्रस्यनुवीर्याणिप्रवो
चमितिसूक्तंशंसतितद्वाएतत्प्रियमिंद्रस्य

स्रक्तं निष्कं वल्यं हैरण्यस्तूपमेतेन वै स्रक्तेन
हिरण्यस्तूप आंगिरस इंद्रस्य प्रियं धामो
पागच्छत्स परमं लोकमजयदुपेंद्रस्य प्रियं
धाम गच्छति जयति जयति परमं लोकं य ए
वं वेद ऋग्वै प्रतिष्ठा स्रक्तं तत्प्रतिष्ठितं मया त्र४
वाचा शंस्तव्यं तस्माद्यद्यपि दूर इव शंसँल्लभ
ते गृहानेवैनानाजिगमिषति गृहा हि पशू
नां प्रतिष्ठा प्रतिष्ठा ॥ २॥ तमी प्रतिष्ठानद्दैवं

क्षत्रं साम्राज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्यमाधिपत्यं
श्र त्रं साम्राज्यं तदाधिपत्यं तद्ब्रध्नस्य विष्टपं तत्प्र
जापते रायतनं तत्स्वाराज्यमश्नुते तमेवैता
भिरेकविंशतिरेकविंशत्या ॥ यद्द्यावा चो द्यावा
पृथिवी यं शंसति द्यावापृथिवी वै प्रतिष्ठे इयमे
त्र४ वेह प्रतिष्ठासावमुत्रेति द्यावापृथिवी यं श
सति प्रतिष्ठया ऽ ऽवैनं तत्प्रतिष्ठापयति तोनु
दितौ द्वंद्वमिंद्र्णा देवताः शस्यंते द्वंद्वं वै मिथुनं
तस्माद्द्वंद्वान्मिथुनं प्रजायते प्रजात्यै प्रजायते

विवाह ॥२९॥

संतिष्ठते वाग्वैस्तु ब्राह्मण्या २

प्रयोगः

प्रजया पशुभिर्य एवं वेद ॥ दक्षिणा अनुस्तु ब्रा
ह्मण्यां त्वं दक्षिणा त्वाद्य एवैतद्वाचि यज्ञमंत
तः प्रतिष्ठापयंति प्रतिष्ठापयंति ॥ ते एते अन्नू ध्य ३
च्यते अग्ने गायत्र्यभवत्सयुग्वेति कल्पतेह
वा अस्मै योगक्षेम उत्तरोत्तरिणीं ह श्रियमश्नु
ते श्नुते ह प्रजानामैश्वर्य्यमाधिपत्यं ॥ तदस्तु
मित्रावरुणा० ॥ सूर्य्यदर्शनाय ॥ ध्रुवा द्यौ ध्रुवा पृ
थिवी ध्रुवासः पर्वता इमे ॥ ध्रुवं विश्वमिदं ज

॥२९॥

गद्ध्रुवो राजा विशामयं ॥ ध्रुवं ते राजा वरुणो ध्रु
वं देवो बृहस्पतिः ॥ ध्रुवं त इंद्रश्चाग्निश्च राष्ट्रं धार
यतां ध्रुवं ॥ हिरण्यकशिपावासीन आचष्टे ॥ ५
हिरण्यकशिपावासीनः प्रतिगृणाति यशो ॥
शो ५ वै हिरण्यं यशसैवैनं तत्समर्द्धयत्योमित्यृचः दै २
प्रतिगर एवं तथेति गाथाया ओमिति वै दैवं त
थेति मानुषं दैवेन चैवैनं तन्मानुषेण च मा
नुषेण च पापादेनसः प्रमुंचति तस्माद्धोराजा ॥

विवाह
॥२७॥

प्रयोगः

विजितीस्याद्यथयमान आख्यापयेत्तैवैत छौनः
न्नेोपमाख्यानं नहास्मिन्न ल्पं चनैनः परिशि
ष्यते सहस्रमाख्या ऋद्धा छं लं प्रतिगरित्र एते वै
वासने श्वेत श्वाश्वतरीरथो होतुः पुत्रकामा हाप्या
ख्यापयेरं लभंते ह पुत्रां लभंते ह पुत्रान् ॥ सु
प्रतिष्ठितमस्तु ॥ ॐ अन्नक्षरा ऋजवः संतु पं
था येभिः सखायो यंति नो वरेयं ॥ समर्यमा सं
भगो नो निनीयात्सं जास्पत्यं सुयममस्तु देवाः ॥

॥२७॥

अन्नक्षरा ऋजवः संविति वरं प्राङ्मुखं वधूं च प्र
त्यङ्मुखीं कृत्वा पित्रादिदीतावरं दत्तवस्त्रा
दिरहितां स्वदेयाभरणाद्यलंकृतां वधू वस्त्र
संक्षिकाहतवस्त्रपरिधानमुक्तं स्वस्त्ययनाय
वरायदद्यात् ॥ तत्रायं क्रमः ॥ दाता वधूवस्य
दक्षिणतः स्वदक्षिणहस्तस्थदज्ञातप्तौ स
हितउदङ्मुखउपविश्य बद्धशिखः शुचिरा
चम्य ॥ कुशपाणिः प्राणानायम्य देशकालौ सं

कीर्त्यममसमस्तपितॄणांनिरतिशयसानंदब्र
ह्मलोकावाप्त्यादिकन्यादानकल्पोक्तफला
वाप्तये अनेनवरेणास्यांकन्यायामुत्पादयि
ष्यमाणसंतत्याद्वादशावरान्द्वादशपरान्
पुरुषांश्चपवित्रीकर्तुमात्मनश्चलक्ष्मीनाराय
णप्रीतयेब्राह्मविवाहविधिनाकन्यादान
महंकरिष्यइतिकुशाक्षतजलेनसंकल्प्य
सपत्नीकोथायोदङ्मुखएवकन्यांसंप्रगृह्य॥

कन्यांकनकसंपन्नांकनकाभरणैर्युतां॥दास्या
मिविष्णवेतुभ्यंब्रह्मलोकजिगीषया॥विश्वं
भरः पंचभूताः साक्षिण्यः सर्वदेवताः॥इमां
कन्यांप्रदास्यामिपितॄणांतारणाय चेति मं
त्रौपठित्वास्वदक्षिणसभार्यादत्तपूर्वकल्पि
तंजलधारामविच्छिन्नांनवकांस्यपात्रोपरिस्थि
तकन्यांजल्युपरिस्थवरांजलिदक्षिणहस्तेक्षि
पन्वदेत्॥कन्यातारयतुपुण्यंवर्द्धतांशिवाओं

पः संतु॥ सौमनस्यमस्तु॥ अक्षतं चारिष्टं चास्तु॥
दीर्घमायुः श्रेयः शांतिः पुष्टिस्तुष्टिश्चास्तु॥
यच्छ्रेयस्तदस्तु॥ यत्पापं तत्प्रतिहतमस्तु॥ पु
ण्याहं भवंतो ब्रुवंतु स्वस्ति भवंतो ब्रुवंतु॥
ऋद्धिं भवंतो ब्रुवंतु॥ श्रीरस्त्विति भवंतो ब्रु
वंतु॥ अमुकगोत्रामुकश र्माहं मम सम
स्तेत्यादिप्रीतये इत्यंतं पूर्वोक्तमुक्त्वा अमुका

मुकप्रवरोपेतायामुकगोत्रायामुकप्रपौत्रायामु
कपौत्रायामुकपुत्रायामुकनाम्ने कन्यार्थिने श्री
धररूपिणे वराय॥ अमुकामुकप्रवरोपेताममु
कगोत्राममुकप्रपौत्रीममुकपौत्रीममुकपुत्रीम
मुकनाम्नीं वरार्थिनीं कन्यां श्रीरूपिणीं प्रजा
पतिदैवत्यां प्रजोत्पादनार्थं तुभ्यमहं संप्रददे॥
कन्यां प्रतिगृह्णातु भवानिति वरहस्ते कुशोक्षे

॥३०॥ तजलं क्षिपन् ॥ प्रजापतिः प्रीयतामिति मनसा स्म
रेत् ॥ कन्यादानेन ममेति न वाच्यमिति केचित् ॥
एवं वारत्रयं कन्या तारयित्वित्यादि कन्यादानेको
र्यमिति शौनक आह ॥ अथ वरः ॥ कन्याया
दक्षिणांसमभिमृश्य ॥ क इदं कस्मा अदात्कामः
कामायादात्कामो दाता कामः प्रतिगृहीता काम स
मुद्रमाविश कामेन त्वा प्रतिगृह्णामि कामै
तत्ते ॥ दृष्टिरसि द्यौस्त्वा ददातु पृथिवी प्रति

गृह्णात्विति जपित्वा धर्मप्रजासिध्यर्थं कन्यां प्र
तिगृह्णामीति वदेत् ॥ दाता ॥ गौरीं कन्यामिमां
विप्र यथाशक्ति विभूषितां ॥ गोत्राय शर्मणे
तुभ्यं दत्तां विप्र समाश्रय ॥ कन्ये ममाग्रतो
भूयाः कन्ये मे देहि पार्श्वयोः ॥ कन्ये मे पृष्ठतो
भूयास्त्वद्दानान्मोक्षमाप्नुयां ॥ मम वं
शकुले जाता पालिता वत्सराष्टकं ॥ तुभ्यं वि
प्र मया दत्ता पुत्रपौत्रप्रवर्द्धिनी ॥ न्यूनवय

स्कानां पालितां सप्तवर्षकमिति वोढुः कार्य्येः॥ धर्मे चा
र्थे च कामे च नातिचरितव्यांत्वये यं नातिचरामि इ
ति वरः॥ दाता देशकालौ संकीर्त्य अमुकतस्य कन्यादा
न प्रतिष्ठासिध्यर्थं इमां सुवर्णदानदक्षिणां तु
भ्यमहं संप्रददे इति सजलं यथाशक्ति सुवर्ण
दानदक्षिणात्वेन वरहस्ते दत्वा नममेति वदेत्॥
ॐ स्वस्तीति वरः॥ ततो दाता जलभाजनं भोजन
भाजनं गोमहिष्याश्वगजदासीदास भूवाह

नालंकारादि यथाविभवं संकल्प्य पूर्वकं वराय दद्या
त्॥ तत्र मंत्राः॥ य इसा धनभूतायै विश्वस्याघप्र हिर
णाशनी॥ विश्वरूप धरो देवः प्रियतांमनया ग या
वा॥१॥ गोः॥ सर्वसस्याश्रया भूमी वराहेण स
मुध्धृता॥ अनंतस्तस्य फलदमतः शांतिं प्रयच्छ मे॥ अ
॥२॥ इति भूमेः॥ इयं दासी मया तुभ्यं श्रीवत्स प्रति
मे पादिता सदा कर्मकरी भूयो भोग्या यथेष्टं भद्रमस्तु
स्तु ते॥ दास्याः॥३॥ अश्वन्यं शयनं नित्यमनूना
श्रयमनंतं॥ सौभाग्यं देहि मे नित्यं शय्यादानेन के

शाव॥शार्यर्या॥४॥हिरण्यगर्भसंभूतं सौवर्णं चांगु
लीयकं॥सर्वप्रदं प्रयछामि प्रीणातु कमला पति॥
अंगुलीयकस्य॥क्षीरोदमथने रत्नं समुद्धृतं कुंड
लद्वयं॥श्रियासह समुद्भूतं ददे श्रीः प्रियतां
मिति॥कुंडलद्वयोः॥इदं गृहं गृहाणेदं सर्वोपस्क
रसंयुतं॥तव विप्र प्रसादेन ममास्त्वभिमतं फलं॥ हि३
गृहस्य॥इंद्रादि लोकपालानां साराज्यं महि
षी शुभा॥महिषासुरस्य जननी सास्तु मेसु

खकामदा॥महिष्याः॥परापवादपैशुन्यादभक्ष्यस्य च
भक्षणात्॥उत्पन्नपापं दानेन ताम्रपात्रस्य नश्य
तु॥ताम्रपात्रस्य॥यानि पापान्यकामानि कामतोपि
कृतानि च॥कांस्यपात्रप्रदानेन तानि नश्यंतु मे
सदा॥कांस्यपात्रस्य इत्यादि॥अथ वरः॥यत्कक्षी
वांत्संवननं विश्वेदेवा अनुष्टुप्॥कुक्ष्यभिमर्शने
विनियोगः॥ॐ यत्कक्षीवां संवननं पुत्रो अंगिर
सामवेत्॥तेन नो अद्य विश्वे देवाः सं प्रियां समजीजन
न्॥इत्यनेन दक्षिणकुक्षिमभिमृशेत्॥अथ पु
नर्कन्या॥

रोधाः कांस्यपात्रे पूर्वार्चितकलशजलं गृ॰ जलं मासि
च्य॥ अनाधृष्टमित्यस्य वामदेव आपो बृहती॥ उद
कान्जिमंत्रणे विनियोगः॥ ॐ अनाधृष्टमस्यना
धृष्यं देवानामोजो अभिशस्तिपाः॥ अनभिश
स्त्यं जसां सत्यमुपगेषां स्तुते मा धाः॥ इतिजल
मभिमंत्र्य साहिरण्यया पवित्रया सकुशादूर्वापल्ल
वया सपर्णयोदुंबर्या॥ द्वियाशाखया वेद्धूव
रावभिषिंचेत्॥ आनः प्रजामिति चतसृणां सूर्यासा

वित्रीसूर्या सावित्री आद्या जगती॥ द्वितीया त्रिष्टुप्॥ अंत्ये द्वे अ
नुष्टुभौ॥ अभिषेके विनियोगः॥ ॐ आनः प्रजां०४॥
समुद्रज्येष्ठा इति चसृणां वसिष्ठ आपस्त्रिष्टुप्॥ अभि०॥ छ
ॐ समुद्रज्येष्ठाः ४॥ आपोहिष्ठेति तिसृणां अंब
रीषः सिंधुद्वीप आपो गायत्री॥ अभि०॥
ॐ आपोहिष्ठा०३॥ वरए वो॥ उदकान्जिमंत्रे
णे कन्याभिषेकं कुर्यादिति केचित्॥ ततो दुग्धा
क्तेन द्विगुण शुक्लसूत्रेण दंपती कंठदेशे कटि

दत्रोईदत्रानीमारभ्यपंचवारं चतुर्वारं प्रदक्षि
णं वेष्टयेत्सुरोधा एतैर्मं- त्रैः॥ ॐ परित्वगि
र्वणोगिर इमाभवं तु विश्वतः॥ वृद्धा
युमनुवृद्धयोजुष्टा भवंतु जुष्टयः॥
तान्वोवैरं महोमरुत एवया व्नो विष्णोरेषस्य
प्रभृथे हवामहे॥ हिरण्यवर्णान्ककुहान्यय
तस्रुचो ब्रह्मण्यंतः शंस्यंराधईमहे॥ दत्रा

वनिभ्योदत्राकस्येभ्योदत्रायोक्रोभ्योदत्रायोज
नेभ्यः॥ दत्राभीशुभ्यो अर्चताजरेभ्योदत्राधु
रोदत्रायुक्तावहद्भ्यः॥ तेअद्र्योदत्रायंत्रास
आदत्रावस्तेषामाधानंपर्येतिहर्यतं॥ तत्तैस्य सु ४
सोम्यस्यांधसोंत्रुंगाः पीयूषंप्रथमस्यभेजि
रेते सोमादोहरीइंद्रस्यभिंसतेशंदुहंतो
अंध्यासतेगवि॥ तेभिर्दुग्धंपपिवांत्सोम्यं
मध्विंद्रोवर्द्धतेप्रथतेवृषायते॥ वृषावो अंशुर्न

किक्कारिषाथनेर्लवंतः सदभितस्छनाशिताः॥
रैवत्येवमहस्ताचारवस्त्रं नयस्यग्रावाणो अ
जुषध्वमध्वरं॥ ततः कंठदेशस्थ मधोनि
क्षाव्यकुंकुमाक्तमूर्णायुक्तं च कृत्वा तेनह
रिद्राखंडं बध्वा॥ वरस्तद्धवामहस्तप्रकोष्ठे
वरोबध्नीयात्॥ नीललोहितमंत्रेणकटिदेशा
त्स्वसूत्रमुपाशिनिष्कास्यतादृशं कृत्वा वरदक्षि
णहस्तप्रकोष्ठवधूबध्नीयात्॥ तेनैवमंत्रेण॥ सूत्र२

यद्दसूत्रवेष्टनाधःकृत्वैवरूवं संपादितकौतुक
सूत्रद्वयमध्ये एकं सूत्रं पुरोधसा विश्वेत्तात
सवुनेषितिमंत्रेपाठितेः कन्यावरस्य दक्षिण
हस्तेबध्नीयात्॥ वरोप्यपरं सूत्रंतथैवकन्या
यावामहस्तेबध्नीयात्॥ यदि सूत्रवेष्टनं क्रि
यते तदा तत्सूत्रबंधनमेवकौतुकसूत्रं संपा
दनं तु पूर्वोक्तेनकार्य्यं॥ ततः अग्नेविश्वेभिरप
तहव्योभिस्त्रिष्टुप्॥ ऊर्णास्तुकबंधनेविनि

योगः॥ ॐ अग्ने विश्वेभिः स्वनीक देवैरूर्णावंतं
प्रथमःसीदयोनिं॥ कुलायिनं घृतवंतं सवित्रे
यज्ञंनय यजमानाय साधु इति मंत्रेण बध्वा
दक्षिणोत्तरकेशपक्षयोः क्रमेण मंत्रावृत्त्या
ऊर्णादिरशांबध्नीयात्॥ ऊर्णास्तकबंधनमो
चारतःकृताकृतं शिरैवाविमुंचतियदिकृ
ते भवतु इत्यग्नेस्सूत्रं निर्देशात्॥ अथवधू
वरावायुर्वर्द्धनमक्षतारोपणं कुर्यात्॥

तद्यथा॥ तैजसपात्रघृतक्षीरगव्यमासिच्य पात्रांतरे
णार्द्रीक्षितभ्रुकुशालीतंदुलानादाय वरः॥ क्षालि
तपाणिः प्रक्षालितवध्वांजलौ क्षीरघृतं स्वहस्तद
र्भांगुलिनिर्द्विरूपस्तीर्य द्विवारं तथैव तंडुलानोप्य
तेन तथैव द्विरभिघारयेत्॥ ततो वरांजलावप्येवमेव
दात्रान्येन वा पूरिते तांदोतदंजल्योः सुवर्णं निधा
यवरांजलिं कन्यांजल्युपरि निधाय कन्या तारय
तु दक्षिणाः पांतु बहुदेयं चास्तु पुण्यं वर्द्धतां शांतिः

पुष्टिस्तु ष्टिश्चास्तु तिथिकरणमुहूर्त्तनक्षत्रसंपदस्तु॥
इत्युच्चार्य्य कन्यामुधृत्या ततं यांजलिस्थानक्षता
न्भगो मे कामः समृध्यतां इति वरमूर्द्धन्यारोप
येत्॥ ततो वरः स्वांजलिस्थान्यज्ञो मे कामः स
मृध्यतां इति कन्यामूर्द्धन्यक्षतान् क्षिपेत्॥ द्वि
तीये॥ श्रियो मे कामः सम[illegible]ध्यतामितिवधूः॥ध
र्मो मे कामः समृध्यतामितिवरः॥ तृतीये॥ प्रजा मे
कामः समृध्यतामितिवधूः॥ यशो मे कामः समृ

ध्यतामितिवरः॥ ततः कन्यावरांजलिं द्विरुपस्तीर्य द्विस्तं
डुलैरापूर्य द्विरभिघारयेत्॥ ततो दाताऽन्येन वा पूर्व
वत्कन्यांजलिं वा पूरिते दाता पूर्ववद्धिरण्यं निधाय
कन्यांजलिं वरांजलौ निधाय पूर्ववत्कन्यातारयति
त्यादिवाक्यषट्कं वदेत्॥ ततो वरः यज्ञो मे कामः समृ
ध्यतामिति कन्यामूर्ध्न्यक्षतान्॥ कन्या तु भगो मे
कामः समृध्यतामिति वरमूर्द्धनि॥ एवं पुनर्द्विवा
रं कार्यं॥ ततो द्वितीये॥ धर्मो मे कामः समृध्यतामिति

विवाहप्र ॥३८॥ | योगः

वरः॥ श्रियोमेइतिवधूः॥ तृतीये॥ यशोमेइतिवरः॥
प्रजामेइतिवधूः॥ तृतीये॥ यशोमेइतिवरः॥ प्रजा
मेइतिवधूः॥ अथवरोवध्वांजलिंपूर्वंबद्धा।पूर्यस्वां
जलिमन्येनपूर्वंपूरयित्वोभौवधूपूर्वकंतूष्णी
मक्षतानारोपयेतां॥ एवंसप्तवारमक्षतारोपणं
कार्यं॥ केचिदक्षतारोपणेभगोमम इत्यादिमंत्रं
नेच्छंति॥ अथवरःस्वशिरःपुष्पमेकंधृत्वैतेना श्री
प्लाव्यतेनकन्यालालाटेतिलकंकुर्यात्॥ सापि

॥३८॥

री

स्वशिरःपुष्पेणतथैववरललाटेतिलकंकृत्वापुष्प
मालांवरकंठेनिदध्यात्॥ वरोपिकन्याकंठे॥ ततो
वरपक्षेसुवासिनीवधूवरौप्राङ्मुखावुपवेश्याऽ
चारप्राप्तांपुत्रींसंकल्पकंवस्त्रद्वयंसकंचुकंरू
क्माणिसूत्रयुतंवध्वैसमर्प्यतामेकंपरिधाप्या
परमुत्तरीयंकुर्यात्॥ ततोवरस्तत्सूत्रं॥ मांगल्यंत
तुनानेनममजीवनहेतुना॥ कंठेबध्नामिसुभ
गेसांजीवशरदांशतं॥ २॥ इतिमंत्रेणेष्टदेवता

स्मरन्न्भव धरकं ठेब ध्नीयात् ॥ ऋषणैम्भ्यायुष्यं वर्च
स्यमितिसूक्तं पठन्नरूपयेत् ॥ ततो हरिद्राखंडयु
तानि पंचे – पंचपूगानि आचाराल्लड्डुकयुतानि
पात्रे निधायतत्रपुरोधाउभाभ्यां गणपतेरा
वाहनादिदक्षिणांतोपचारैर्गणानांत्वा आतू
नइंद्रस्तु मंतं चित्रं ग्राभं सं गृभाय ॥ महाहस्तीद
क्षीणेन ॥ इतिमंत्राभ्यां पूजां कारयेत् ॥ ततो ब्राह्मणे
भ्यो वरेणयथाशक्ति गणपतिप्रीत्यै दक्षिणा देया ॥
प्रीतये

ततः पुरोधास्तानिहरिद्राखंड[illegible]डादियुतानि पूगा
निदंपत्योरुत्तरीयांतयोः पृथक् पृथक् विवाह प्रत स
[illegible] दक्षिणां गणपतिं अनुस्मृत्य पूजा
मंत्राभ्यां बध्नीयात् ॥ वधूवरौ विवाहव्रतसमाप्य
तं ग्रंथिद्वयं न विसृज्येतां ॥ ततः पुरोधाः नीललोहि
तं भवतीति मंत्रेण तयोरुत्तरीयांतौ भ्येबध्नीया
यात् ॥ ततः सभार्यो दाता वधूवराः पुरश्चाया शालिबा
धवाभ्यं कमौ दारौ स्त्रिरा द्रीक्षीलारोपणं कुर्युः ॥ ततो

दंपती पात्रस्थसिततंदुलपुंजत्रयेऽदक्षुं स्थाय महाल
क्ष्मीं पार्वतीं शचीं च ॥ षोडशोपचारैर्नाममंत्रेण ॥
भ्यर्च्य सौभाग्यादि प्रार्थयेतां ॥ अथ तिथ्यादि सं
कीर्त्य चतुर्दिवसपर्यंतं विवाहव्रतं चरिष्यावहे इति
इति संकल्प्य प्रथमदिने रोहिणीं सोमं सूत्वा
दाक्षायणीं पूजयेतां ॥ ततो वधू [illegible] हरिद्रा
जीरकादिमंगलद्रव्यपरिपूर्णं वंशपात्रे वाय

नारीभ्यः सुवासिनीभ्यो लक्ष्म्यादिदेवतात्रयप्री
त्यै यथाशक्ति दद्यात् ॥ अथ द्विदैरा षोडशदे
याः ॥ लग्नमंत्राः ॥ भद्रंकर्णेभिः शृणुयाम देवा भद्रं
पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरंगैस्तुष्टुवांस
स्तनूभिर्व्यशेम देवहितं यदायुः ॥ १ ॥ द्रविणो
दा द्रविणसस्तुरस्य द्रविणोदाः सनरस्य प्रयंसत् ॥
द्रविणोदा वीरवतीमिषं नो द्रविणोदा रा
सते दीर्घमायुः ॥ २ ॥ सविता पश्चात्तात्सविता

पुरस्तात्सवितोत्तरात्तात्सविताधः धराचात्तात्।
सविता नः सुवतु सर्वतातिं सविता नो रासे
तां दीर्घमायुः ॥३॥ नवोनवो भवति जायमा
नोऽह्नां केतु रुषसामेत्यग्रं ॥ भागं देवेभ्यो
विदधात्यायन्प्र चंद्रमास्तिरते दीर्घमा
युः ॥४॥ उच्चा दिवि दक्षिणावंतो अस्थु
र्ये अश्वदाः सह ते सूर्येण ॥ हिरण्यदा

अमृतत्वं भजंते वासोदाः सोमप्रतिरंत आयुः ॥
॥५॥ दक्षिणावतामिदिमानि चित्रा दक्षिणाव
तां दिवि सूर्यासः ॥ दक्षिणावंतो अमृतं भजंते
दक्षिणावंतःप्रतिरंत आयुः ॥६॥ दत्यापुःपदां
तोः ॥ ततो वधूवरौ परस्परं हस्तं धारयेन्न बहि
न रंगपर्यस्थापूर्वोक्तलक्षणां वेदीमंत्रघोषेणाग
च्छतां ॥ प्रयोगपारिजाते तु गृह्यपरिशिष्टानु
सारेण कन्यादानतत्सतिग्रहजवनिकाप्र

र्वकमंत्रवन्निरीक्षणाक्षतारोपणदास्यादिदा
नपुरोधकर्त्रकाशिषकपरस्परक्षीरघृतैर्ति
लककरणमालारोपणपूर्वसंपादितकौ
तुकसूत्रबंधंगणपतिपूजनंक्रमुकबं
३३ धनादित्रयमनुष्ठानक्रमउक्तः॥सचदे
शाचारवशेनानुकर्त्तव्यः॥अथखलुग्रा
वचजनपदधर्माग्रामधर्माश्चतान्विवा

हेप्रतीयादितिसूत्रतःपदास्वरूपइवलक्ष्मेपिस
मुखोद्वहाचारप्रामाण्यस्योक्तिदिक्॥इति
प्रयोगरत्नेकन्यादानप्रयोगः॥अथविवाह
होमः॥वरःप्रागुक्तवेदिकायांपीठंप्रासनेप्रा
ङ्मुखउपविश्यपश्चिमभागेआनियतंवाचं
वधूमानीयस्वदक्षिणउत्तरेवाविश्यद्विराच
म्यप्राणानायम्यदेशकालौसंकीर्त्यममप्रति
गृहीतायांअस्यांवधूभार्यात्वसिद्धयेगृह्या

ग्निसिद्ध्येचविवाहहोमंकरिष्ये॥ तदंगस्थंडिलो
ल्लेखनाद्यग्निप्रतिष्ठांतं कृत्वाग्नेः प्रत्यक् दृषदं
सोपलांप्रतिष्ठाप्य प्रागुदीच्यां धान्यराशौ रु
पर्युदकं पूर्णकुंभं निधाय तं पल्लवै रपिधाय
गंधपुष्पैरलंकृत्योदगग्नेः सप्ततंडुलराशीन्
प्रकल्प्य॥ समिद्द्वयमादाय देशकालौ कथ
नपूर्वकं मास्मिन्विवाहहोमे देवतापरिग्रहा
र्थं मन्वाधानं करिष्ये अस्मिन्नन्वाहितेग्नौ

जातवेदसमग्निमिध्मेन प्रजापतिं प्रजापतिं
२ चाघारदेवते आज्येनात्र प्रधानं त्रिरग्निंपव
मानं सकृदग्निं प्रजापतिं चैताः प्रधानदेवताः
आज्यद्रव्येण पुनरत्र प्रधानं अर्यमाग्निं वरु
णाग्निं पूषाग्निं प्रजापतिं चैताः प्रधानदे
वताः लाजद्रव्येण शेषेण स्विष्टकृतमित्यो
ष्क हो समस्तव्याहृतिभिरन्नावाधायप्र
जापतये स्रुवहोमापरिसमूहनादिकं वापात्रा

सादनं कुर्यात्॥ तत्र प्रोक्षणीस्रुवं चमसाज्य
भाजने ध्माबर्हिर्व्यासाद्यपात्रपश्चिमतो
लाजाश्च शूर्पं चासाद्याग्निप्रपणांतं कृत्वाज्यं
लाजैः सह पर्य्यग्निकरणं कृत्वा॥ ज्यो
तवनैक कृते लाजा॥ स्रुवप्रोक्ष्य स्रुवं संमृ
ज्याघ्वान्वारब्ध इध्माधान आघार होमौ
कुर्यात्॥ आज्य भागौ नस्तः॥ अथ प्रधान
होमः॥ अग्न आयूंषीति तिसृणां शतं

वैखानसा ऋषयः॥ अग्निः पवमानो देवता
गायत्री छंदः॥ विवाहप्रधानाज्यहोमे विनि
योगः॥ ॐ अग्न आयूंषि० स्वाहा॥ ॐ अग्नये प
वमानायेदं न मम॥ अग्निर्ऋषिः॥ अग्ने पव
स्व०॥ त्वमर्य्यमा वसुश्रुतोग्निस्त्रिष्टुप्॥ प्रधा
नाज्य०।ग०॥ ॐ त्वमर्य्यमा भवसि यत्कनीनां
नाम स्वधावन् गुह्यं बिभर्षि। अंजंति मित्रं सुधि
तंन गोभिर्यद्दंपती समनसा कृणो॥ षि स्वाहा॥

अग्नयइदंन॥प्रजापते हिरण्यगर्भः प्रजाप
ति स्त्रिष्टुप्॥विवा०प्र०होमे॥ ॐ प्राजापतये०॥स्वा
हा॥प्रजापतय इदंन॥एवं पंचाज्याहुती हुत्वा
प्राङ्मुखोपविष्टायाः पुरः प्रत्यङ्मुखस्तिष्ठ
न्नुत्तानेन हस्तेन वरदक्षिणकरं गृभ्णामी
तिग्टहीयात्॥गृभ्णामिते सूर्य्यासावित्री सूर्यासा
मित्री त्रिष्टुप्॥पाणिग्रहणे विनियोगः॥ॐ गृभ्णा

मिते सौभगत्वाय हस्तंमयापत्याजरदष्टिर्यथा
सः॥भगो अर्य्यमा सविता पुरंधिर्मह्यंत्वादुर्गा
र्हपत्याय देवाः॥इति तलोवधूमुखावलोकनान्ते यथा
शौक्षालयित्वांजलिं कारयित्वा प्राङ्मुख्यास्त
स्याः अंजलौ वरः स्रुवेणाज्यमुपस्तीर्य्य व
धूभ्रातृभ्रातृस्थानीयेन वा पितृव्यपुत्रा
दिना तिष्ठतन्तूरूपस्थान्मुष्ट्या द्विरावाप्य स्वयं
चेत्सचावत्ती तदा त्रिरावाप्य स्वयं प्रत्यस्थान

लो[illegible]जान्र

भि घार्य्यांजलिस्थान पि स कृदभि घार्य ॥ अ
र्य्यमिणं वामदेवो र्य्यमाग्निरनुष्टुप् ॥ विवाह
लाजाहोमे॰ गः॥ ओं अर्य्यमणंनु देवंकन्या
आग्निमयक्षत॥ सइमांदेवो अर्य्यमाः प्रे
तोमुंचातुनामुतस्वाहा॥ इतिमंत्रंपठित्वा
तिष्ठन्तिष्ठंत्याध्वतांजलिरंजलिविच्छेदनो
गुल्यग्रैरंजलिपाश्वाभ्यां वाहावयेत् ॥ वरोअर्य्यं
माग्नयइदनमम॥ ततोहंदुपलवर्ज्जमग्निमुदकुं

षप

भंपात्राणि वधूं प्रदक्षिणंपरिणयन्स्वयमग्रेगच्छन्
जपेत् ॥ ओं अमोमास्मिसात्वं सात्वमस्यमोहं द्यौरहं पृथि
वीत्वं सामाहम् केतावेहविवहावहै ॥ प्रजांप्रजनया
वहै संप्रियौरोचिष्णु सुमनस्यमानौ जीवेमशरदः
शतमिति ॥ ततोवधूं प्राङ्मुखी द्वाभ्यामपिपादाभ्यांहृ
षदं ॥ इममश्मानंवामदेवोवधूरनुष्टुप् ॥ अश्मारो
हणेविनियोगः ॥ ओं इममश्मानमारोहाश्मेवत्वं स्थि
राभव ॥ सहस्वपृतनायतो भितिष्ठपृतन्यतः ॥ इति

मंत्रेणारोपयेत् ॥ पुनः पूर्ववदंजल्युपरिस्तरणादि ॥
वरुण ... मुवामदेवो वरुणाग्निरनुष्टुप् ॥ वि॰ ला॰ ग॰ः
ॐ वरुणंनु देवंकन्याग्निमयक्षत ॥ सइमां देवो व
रुणः प्रेतो मुंचातु नामुतः स्वाहा ॥ वरुणाग्नय इदं
न ममेतिल्युक्त्वा पुनरमोहमस्मीति पूर्ववत्प्रदक्षिणीयेम
मश्मानमित्यश्मानमारोपयेत् ॥ पुनः पूर्ववदंज
ल्युपरिस्तरणादि ॥ पूषण मुवामदेवः पूषाग्निर
नुष्टुप् ॥ वि॰ ला॰ ग॰ः॰ ॐ पूषणंनु देवंकन्याग्निमय

क्षत ॥ सइमां देवः पूषाः प्रेतो मुंचातु नामुतः स्वाहा ॥ इ
इति सर्वं वाचयित्वा ॥ पूषाग्नय इदं न ममेतिल्युक्त्वा ॥
सर्ववदमोहमस्मीत्यग्निं परिणीयेमम श्मानमारोप
येत् ॥ ततो वरः ध्रुव ... वा वशिष्ठान् सर्वोन्लाजा
नात्माञ्जलिमुखं श्रूर्पकोणेन जुहोति ॥ तदा वरः प्रजा
पतय इ ... तिसृस्य त्वा स्वाहेत्ये ... श्चार्य प्रजापतय इदं
न ममेतित्यजेत् ॥ अत्र परिणयनाश्मारोहणेनस्तः
ततो वरः प्रत्वा मुंचामीति द्वयोः सूर्या सावित्री स्त्या ॥

सावित्री आद्या त्रिष्टुप् ॥ द्वितीयानुष्टुप् ॥ शिखा विमुंचने
विनियोगः ॥ ॐ प्रत्वामुंचामि ॥ इति दक्षिणशिखां मुं
चति ॥ ॐ प्रेतो मुंचामि इत्युत्तर शिखां विमुंचति ॥
शिखाबंधनाभावेन विमोकः ॥ अथाग्नेरुदीच्यां स
प्ततंडुलराशीन्कृत्वा श्रीमाहूताव ध्वादक्षिणपादेन वरः
क्रमेणाभ्युक्रामयेन्मंत्रैः ॥ तत्र इष एकपदी भवसा
मामनुव्रताभव ॥ पुत्रान्विंदावहै बहूंस्ते संतु जर
दष्टय इति प्रथमं ॥ ऊर्जे द्विपदी भवेत्यादिना द्वितीयं ॥
रायस्पोषाय त्रिपदी भवेत्यादिना तृतीयं ॥ मायोभ

वि २

वाय चतुष्पदी भवेत्यादिना चतुर्थं ॥ प्रजाभ्यः पंचप
दी भवेत्यादिना पंचमं ॥ ऋतुभ्यः षट्पदी भवेत्यादि
ना षष्ठं ॥ सखा सप्तपदी भवेत्यादिना सप्तमं ॥ राशिं
भवेत्यादिः सर्वत्रानुषंगः ॥ ततः पूर्वस्थापितमुदकुंभं धृत
केचिदानीय यत्र तत्र स्थ एव वरः ॥ स्वशिरसा वधू
शिरः संयोज्य सकलशस्थमुदकमादायाद्यावामे
शिरः शांतिरस्त्वित्यादिपंचदशमंत्रैः अभिषिच्य
स्वासने उपविश्याज्येन स्विष्टकृद्धोमं कृत्वाद

ध्रुवसंन्नहनहोमादिबर्हिषिपूर्णपात्रनिनयनां
तंसमाप्यविभूतिवंदनंकृत्वोंचमइत्युपस्थाय
पूर्ववद्धावुत्तरीयांतौ लूक्लौ विस्त्रस्यदिने विवा
हेसायंसंध्यामुपास्य ध्रुवमरुंधतीसप्तऋषिप्र
दर्शतीन्चे ध्वासहृदध्रुवजीवपत्नीप्रजांविंदेये
तिवध्वावाचयेत् ॥ ततोवधूर्वाग्दिंयमंविस
र्जेत् ॥ रात्रिविवाहे संध्यामनुपास्यैव ध्रुवा
दिदर्शनादिप्रदोषकालोपलक्षणमेतत् ॥ ते

नमेघादिनानक्षत्रैर्दर्शनेपितस्मिन्कालेवाग्विसर्गः॥
उत्पातादिनाचदिवानक्षत्रदर्शनेपिनविसर्गः॥
एतदादिविवाहाग्निमाजिरक्षेत् ॥ विवाहादारभ्य
ह ३ दंपतीयगृहप्रवेशनीयहोमोत्तरंत्रिरात्रंद्वादशरा
त्रंसंवत्सरंवायावद्क्षारलवण[illegible]शीना[illegible]
वऽलंकुर्वीणावधःशायिनौब्रह्मचारिणौस्यातां॥
ब्राह्मण्याश्चदक्षायाजीवपत्याजीवप्रजायागा
रएतांरात्रींवसेत् ॥ ग्रामांतरगंतव्येयद्यंतरेवास

स्यतदायंविधिः॥स्वग्रामविवाहवतुना॥अथगृहप्रवे
शहोमः॥ ॥अयंचगृह्यकृतास्वतंत्र्यंविधिः॥स्व
ग्रामविवाहवतुना॥प्रयाणविधेरनंतरंमुक्त्वासमा
ख्यावशात्तुविवाहदिने दिनांतरे वास्वगृहएवगत्वा
कर्तव्यइतिमुख्यःकल्पः॥शिष्टास्तुश्वशुरएवगृ
हेकुर्वंति॥अत्र ऽयथादेशाचारंव्यवस्था॥प्रयो
गपारिजातेप्येवं॥अथप्रयोगः॥वरःस्वगृहेदेश
कालौसंकीर्त्यममविवाहाग्नेर्गृहवसिद्धिद्वारा

श्रीपरमेश्वरप्रीत्यर्थंगृहप्रवेशनीयहोमंकरिष्यइ
तिसंकल्प्यस्थंडिलकरणाद्यग्निप्रतिष्ठांतंकृत्वाश्व
शुरगृहेविवाहहोमानंतरमेवैतत्करणेतुअग्नेस्था
पितत्वात्संकल्पमात्रंकृत्वागृहप्रवेशनीयहोमदे
वतापरिग्रहार्थमन्वाधानंकरिष्यइतिसंकल्प्याग्नि
न्नन्वाधाहितेग्नावित्यादिचक्षुषीआज्येनेत्यंतमु
क्त्वाऽत्रप्रधानंसूर्यांसावित्रीं०चतुर्वारमाज्येनशेषे
णस्विष्टकृतमित्याद्युक्त्वाऽग्नौसमिधमाधायपरि

सम्मूहनादि कुर्यात्॥ततः प्रत्यगग्नेः स्वदक्षिणदेशे प्रा
ग्ग्रीवं मुत्तरलोमकमानडुहं चर्मास्तीर्य्य तस्मिन्वधू
मुपवेश्य पत्न्य न्वारब्धः प्रधानाद्याज्यभागां
तं कृत्वा॥ आनः प्रजामित्यादि ऋक्चतुष्टयस्य सूर्या
सावित्रिरृषिः॥ सूर्यासावित्रिर्देवता प्रथमा जगती
द्वितीया त्रिष्टुप्॥ तृतीयाचतुर्थ्यावनुष्टुभौ॥ उप्र
वेशनीयप्रधानाज्यहोमे विनियोगः॥ ॐ आनः प्रजां
जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा॥ अ

२ अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः॥ वीरसूर्देवकामा
दुर्मंगलीः पतिलोकमाविशशन्नो भव द्विपदे शं चतुष्प
दे स्वाहा॥ इमां त्वमिंद्र मीढ्वः सुपुत्रां सुभगां कृणु॥ दशा
स्यां पुत्रानाधेहि पतिमेकादशं कृधि स्वाहा॥ सम्राज्ञी
श्वशुरे भव सम्राज्ञी श्वश्र्वां भव॥ ननांदरि सम्राज्ञी
भव सम्राज्ञी अधि देवृषु स्वाहा॥४॥ अत्र ऋगंते स्वा
हाकारं पठन्नाज्याहुतीर्जुहुयात्॥ सर्वत्र सूर्यासावि
त्र्यै इदं न ममेति त्यागः॥ समंजंत्वित्यस्य सूर्यासावित्र्य
नुष्टुप्॥ दधिप्राशनपक्षे आज्यशेषेण हृदयांजने वि

स्योनाशिवान्तो भव २० स्वाहा

नियोगः॥ ॐ समंजंतु विश्वेदेवाः समापो हृदयानि नौ॥
संमातरिश्वा सं धाता समुदेष्ट्री दधातु नौ॥ अनेन सकृ
त्पठितेन दधिप्राश्यापत्नीमपि प्राशयेत्॥ हुतशिष्टाज्ये
न वा स्वस्य पत्न्याश्च हृदयांजनं कार्यं हस्तं प्रक्षाल्याज्येन
स्विष्टकृदादिहोमशेषं समाप्य पतिपुत्रवती स्त्रिः कृतनी
राजनौ दंपती द्विजाशिषो गृहीत्वा मुदितौ तिष्ठतां॥ अ
त्र विशेषमाहाचार्यः॥ अर्द्धरात्रे व्यतीते तु परेद्युः प्रातरे
व हि॥ गृहप्रवेशनीयहस्यादितियज्ञौ विदो विदुरिति॥
लतो विवाहाद्वितीयाहे दंपती अपस्परोगंधर्वो भूत्वा

महादेवीं तृतीयाहे स्वाहाग्नी भूत्वा कालिकां चतुर्थो
हे मानवो भूत्वा शांकरीमावाहनादिभिः पूजयेतां॥ गृ
हप्रवेशनीयांते पूर्वोक्तं त्रिरात्रादिकाले व्रतं चरित्वा वि
वाहकाले वध्वा परिहितं वासः॥ प्रक्षाल्य सत्येनोत्तभि
ताभूमिरित्यादि सूक्तं सख्या सूर्यां पठतो वृत्तश्च जा
स्त नते ब्राह्मणाय वरो दद्यात्॥ ततो व्रतसंपूर्त्यर्थं यथाश
क्ति ब्राह्मणान्भोजयित्वा ॐ स्वस्ति भवंतो ब्रुवंतु इति
तानुक्त्वा ॐ स्वस्तीति तैर्वाचयेत्॥ ॥ अथ चतुर्थदि

नरात्रौ तत्रभद्रादिसंभवे दिन एव शिष्टाचारप्राप्तं वरमा
त्रे तत्समाय्यैव ऐरिण्याख्यं क्षुद्रषोडशाश्रुपयुतमहावं
शपात्रदानं कार्य्यं कन्यादात्रा ॥ सवस्त्रफळतांबूलदं
पत्योर्वंशवर्द्धनं ॥ ऐरिण्याख्यं वंशपात्रं पक्वान्नैः परि
पूरितं ॥ करकै रुद्रसंख्याकैः सुवर्णपरिपूरितैः ॥ ए
तावदैरिणीरूपं कर्त्तव्यं किल सूरिभिः ॥ एवं संपाद्य.
कन्यादाता सभार्यो देशकालौ संकीर्त्य विवाहस्य सं
पूर्णफलप्राप्त्यर्थं वरस्य तत्पितृमात्रादीनां च तत्संया क्षिः
णां यथाविभव वस्त्रादिभिः पूजनमहं करिष्ये इति

संकल्प्य वरतत्पितृमातृभ्रात्रादिभ्यः क्रमेण यथाविभवं
पट्टपट्टीदुकूलवस्त्रादि दत्वा पुनस्तिथ्यादि संकीर्त्य मम
उमामहेश्वरप्रीतिद्वारा कन्यादानफळसंपूर्णतायै वं
शाभिवृद्ध्यर्थं च ऐरिणीपूजनं वरमात्रे ऐरिणीदानं च
करिष्ये ॥ अन्यच्च ॥ कृतस्योद्वाहकर्मणो यथावत्कल्पो
क्तफलप्राप्त्यर्थं वधूवरयोरात्मनश्च संतानकामा
यवंशवृद्ध्यर्थं पुत्रपौत्राद्याप्यक्षयसिद्ध्यर्थं द्वि द्वा
५२ राश्रीउमामहेश्वरप्रीत्यर्थं ऐरिणीपूजाग्रहणं तसोप
स्कारवंशपात्रदानमहं करिष्ये ॥ तदंगं ऐरिणीपूज

नमहं करिष्ये॥ ऐरिणी त्वमुमादेवी महेशो गिरिजापतिः॥
अतस्त्वां पूजयिष्यामि ऐरिणी सर्वकामदा॥ सवस्त्रां च
सदीपां च श्रूपैः षोडशाभिवृतां॥ वरमात्रे प्रदास्या
मि कन्यार्दनस्य सिद्धये॥ इति संकल्प्य महावंश
पात्रे उमामहेश्वरौ षोडशोपचारैः पूजयित्वा वंशपा
त्रं वरमात्रे दत्वा मंत्रान्पठेत्॥ वंशोपवंशाकरश्रेष्ठो
वंशो वंशसमुद्भवः॥ अनेन वंशदानेन तुष्टो वृद्धि
करो भव॥ वंशपा[illegible]त्रपात्रमिदं पुण्यं वंश[illegible]संसमुद्भवं
वंशानामुत्तमं दानमतः शांतिं प्रयच्छ मे॥ वंशपा

त्र२

८

त्राणि सर्वाणि मया संपादितानि वै॥ उमाकांताय दत्ता
नि॰ यै मम गोत्राभिवृद्धये॥ वंशवृद्धिकरं दानं सौभाग्या
दि समन्वितं॥ वस्त्रेणाच्छादितं पूगफलहेम समंस
मन्वितं॥ सर्वपापक्षयकरं नानाद्रव्यैस्तु पूरितं॥ दा
नानामुत्तमं दानमतः शांतिं प्रयच्छ मे॥ इति॥ ततः क
न्यावरपितृमातृकुलसंगयोः पृथगुपवेश्य पृथक्कौ
प्रार्थयेत्॥ अष्टवर्षा भवेत्कन्या पुत्रवत्पालिता मया॥ इ
दानीं तव पुत्राय दत्ता स्नेहेन पालिता॥ जीव[illegible]रुद ल्यतां२
तौ॥ तन्मंत्रेण रोदनेपरिहारार्थं पठेत्॥ ॐ जीवं रुदंति

त्रै त्र२

विमयं तेअ. ध्वरे दीर्घामनुप्रसितिं दीधिषुर्नरः॥ वामंपि
तृभ्योय इदं समेरिरे मयः पतिभ्योजनयः परिष्वजे॥
वरमात्रा व. धूमात्रादितत्पक्षसुवासिनीभ्यः स्वकं
चुकंचु द्रवंशभृत्पर्णवायनदानादिव धाकारणीय
मित्याद्याचारप्राप्तं यथाचारं ज्ञेयं॥ इदमैरिणीपू
जादिव धापितृभ्यांअभुक्तव द्भ्यांकृत्वा भोजनंका
र्यं॥ ॥इति प्रयोगरत्ने ऐरिणीपूजादिचतुर्थदिनकृ
त्यं॥ अथ देवकोत्थापनमंडपोद्वासनविधिः॥ समे चादि
वसे कुर्याद्देवकोत्थापनं बुधः॥ षष्ठं चापि षमे नेष्टं

न२

मुक्त्वा पंचमसप्तमौ॥ समेषु षष्ठं विषमेषु च पंचमसप्तमा
तिरिक्तं दिनं नात्रेष्टमित्यर्थः॥ रात्रौ देवकोत्थापनं निषि
द्धं॥ उक्तकाले मंडपातः सपत्नीकः स्वासने उपविश्या
चमन प्राणानायम्य देशकालौ संकीर्त्य अद्य विवा
हांगत्वेन स्थापितदेवतानामुत्थापनं मंडपोद्वासनं पु
ण्याहवाचनं च करिष्ये इति संकल्प्य सर्वा देवताः प्रत्य
हवत्पूजयित्वा॥ उत्तिष्ठ ब्रह्मणस्पते देवयंतस्त्वेम
हे॥ उप प्रयंतु मरुतः सुदानव इंद्र प्राशूर्भवा सचा॥
अभ्यारामिदद्रयो निषिक्तं पुष्करे मधु॥ अवतस्य विसर्जने॥

व२

इति विसृज्य भगवत्यर्द्दीनां मंडपांत स्तैलाभ्यंगोद
र्तेनोष्णोदकस्नानानि कारयित्वा वेष्टनं सूत्रमुन्मु
च्य स्वास्तिवाचनं कुर्यात् ॥ ततो द्विजै रभिषेकः
कार्यः ॥ ॐ दीक्षा वै देवेभ्यो पाक्रामत्तां वासंतिका
भ्यां मासाभ्यां अन्वयुंजत तां वासंतिकाभ्यां मासा
भ्यां नोदाप्नुवंस्तां ग्रैष्माभ्यां तां वार्षिकाभ्यां तां शा
रदाभ्यां तां हैमंतिकाभ्यां मासाभ्यामन्वयुंजत तां है
मंतिकाभ्यां मासाभ्यां नोदाप्नुवंस्तां शैशिराभ्यां
मासाभ्यामन्वयुंजत तां शैशिराभ्यां मासाभ्यां

माप्नुवंश्चिनाप्नोति यमीप्सति नैनं द्विषंश्चिनाप्नोति यमी
प्सति तस्माद्यं सत्रियादीक्षोपनमेद्दैतयोरेव शैशिरयो
र्मासयोरागतयोर्दीक्षेत साक्षाद्देवत दीक्षायामाग
तायां दीक्षते प्रत्यक्षा दीक्षां परिगृ(ह्णा)ति तस्मादेतयो
रेव शैशिरयोर्मासयोरागतयोर्य चैव ग्राम्याः पश
वो ये चारण्या आणिमाणमेव तत्सर्पि माणं नियंति दी सृ४
क्षारूपमेव तद्रूपनिष्कुर्वते सपुरस्ताद्दीक्षायाः प्राजा
पत्यं पशुमालभेत तस्य सप्तदश सामिधेनीरनु
ब्रूयात्सप्तदशो वै प्रजापतिः प्रजापतेराप्त्यै तस्याप्रि

योजामदग्न्योभवंतितदाकुर्यदइन्येषुपशुषुयथ ऋ
ष्याप्रियोभवंत्यथकस्माद्स्मीं सर्वेषां जामदग्न्य
एवेति सर्वरूपावैजामदग्न्यः सर्वसमृद्धःसर्वरू
प एवपशुः सर्वसमृद्धस्तद्य उजामदग्न्योभवंतिस
र्वरूपतायै सर्वसर्वसमृद्ध्यैतस्यवायव्यःपशुपुरो
ॐ ळाशोभवतितदाकुर्यदन्यदेवत्यउतपशुर्भवत्यथ
कस्माद्वायव्यःपशुपुरोळाशः क्रियत इति प्रजापतिर्वै
यज्ञो यज्ञस्यायातयामतायाइति ब्रूयाद्वायव्य
स्तेन प्रजापतेर्नेति वायुर्वै प्रजापतिस्तदुक्तमृ
षिणापवमानः प्रजापतिरितिसत्रेष्ठु चेत्सन्नु पाग्नी

यू

न्यजेरंस्सर्वे दीक्षेरंत्सर्वे सुनुयुर्वसंतमभ्युदवस्यंन्येवै व
संत इषमेवतदूर्जमभ्युदवस्यति ॥१॥ इति ब्राह्मणं ॥ चैवेदि
काःपठति ॥ इत्यभिषेकः कार्यः ॥ अभिषेकांते पुरोधास्तर्थशाखा
दिवंशपात्रेनिधाय तदुपरि प्रक्षिप्ताभिषेकजलं सकुटुंबं य
जमानशिरसि किंचित्स्रावयन् ॥ प्राचीति छत्या दधातिते
नप्राचीं दिशं जयति तं दक्षिणापरिवहंति तेन दक्षिणां
दिशं जयति तं प्रत्यंचमावर्त्तयंति तेन प्रतीचीं दिशं ज
यति तमुदीचीं छत उपावहरंति तेनोदीचीं दिशं जयति सा
मेन राज्ञा सर्वा दिशो जयति य एवं वेद ॥ प्रीति चोतिच्येत
सर्वे स्वस्त्ययनं यत्प्रीति चेति ते धोस्य प्रियस्या त्तमेतेनानु

॥४८॥ मंत्रयेतप्रति चेति चेति स्वस्त्येव गच्छति स्वस्ति पुनरागच्छति ॥
एवं त्रिः कुर्यात् ॥ ततः के नो शिरसि बद्धांजलिः स्वस्वद्गोत्रेष
षु षट्सु मासेषु श्रो भन मास्त्वेति द्विजानुमार्थयेत् ॥ ते चस्तु
स्तीति ब्रूयुः ॥ ततो द्विजेभ्यो दन तांबूल दक्षिणादि नोसजायि
तां तदा ज्ञेपो मंत्री कोम्ह्रीयात् ॥ इत्यादि देवांकुलो चारे
नुसारेण कार्यं ॥ इति प्रयोगरत्ने देवकस्थापन मंडपोद्वासन
थ८ विधिः ॥ ॥ अथ प्रथमगृहप्रवेशः ॥ दंपती युक्ताचम्य देशकालौ
लोस्मृत्वा अनयानवोढयाव ध्वा सह गृह प्रवेशांग भूतं
ब्राह्मणैः सह पुण्याहवाचयिष्ये ॥ इहश्रियंप्रजयाते समृ
ध्यतामस्मिन्गृहे गार्हपत्याय जागृहि ॥ एनापत्यातन्वा
संसृज स्वाथा जिव्री विदथमाविदाथः ॥ इति गृह प्रविश्य ॥
॥ ॥ नंतोयथाचार गणपति लक्ष्मी पूजनं कुर्यात् ॥ ॥ शुभ ॥ ॥